# Mangala Ashtakam

# મઙ્ગલાષ્ટકમ્

## Document Information

Text title : Virashaiva Vivaha Mangala Ashtakam

File name : vivAhamangalAShTakam.itx

Category : misc, mangala, aShTaka, vIrashaiva

Location : doc_z_misc_general

Transliterated by : Manish Gavkar

Proofread by : Manish Gavkar

Latest update : September 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2023

*sanskritdocuments.org*

# મઙ્ગલાષ્ટકમ્

કલ્યાણૈકનિદાનભૂતમિતિ યત્કાલાગ્નિરુદ્રાદિભિઃ
    પ્રખ્યાતોપનિષદ્ભિરધ્યવસિતં વિશ્વસ્તપાપવ્રજમ્ ।
ભસ્મેતિ સ્મૃતિમાત્રતો ભુવિ નૃણાં મૌનીન્દ્રભોગપ્રદં
    રુદ્રાણીરમણપ્રિયં તદમિતં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૧॥

લોકે શ્રીશિશિરક્ષમાધરસુતાકાન્તાક્ષિપઙ્કેરુહ-
    સ્યન્દિક્ષીરકણોદિતં હિ યદિતિ ખ્યાતં પુરાણે શ્રુતૌ ।
શ્રેયઃસાધનતાન્દધાનમનિશં શૈવપ્રમોદાવહં
    રુદ્રાક્ષં શ્રિતરક્ષકં તદમિતં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૨॥

સ્વાન્તર્ગર્ભિતસર્વમન્ત્રકલનાલબ્ધવ્યનાનાફલં
    સ્મારં સ્મારમિહ સ્મરારિસદનં પઞ્ચાક્ષર પાવનમ્ ।
યચ્છૈવાઃ પ્રતરન્તિ દુસ્તરમહાસંસારવારાન્નિધિં
    ભૂયસ્તદ્વરમન્ત્રરત્નમમિતં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૩॥

અજ્ઞાનાતિશયાધિકાન્ધતમસાત્યન્ધસ્ય પુંસઃ સદા
    સુજ્ઞાનાઞ્જનસાધનેન મહતા ચક્ષુઃસમુન્મીલિતમ્ ।
યેન સ્વચ્છમતુચ્છભૂતિકરુણાકલ્લોલિનીવલ્લભ-
    શ્રીમાન્ સદ્ગુરુરત્ર સૈષ ભગવાન્ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૪॥

સમ્બન્ધાતિશયં સદા વિરચયત્યાગાઙ્ગયોગાઙ્ગસ-
    દ્ભોગાઙ્ગપ્રતિભેદભિન્નતનુષુ શ્રુત્યન્તસઙ્ઘસ્તુતમ્ ।
લિઙ્ગાઙ્ગદ્વયસામરસ્ય વિલસચ્ચેતઃસ્વરૂપપ્રદં
    લિગં શ્રીકરમુત્તમં તદમિતં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૫॥

જાનાતીહ મુહુઃ ક્ષિતાવતિશયં વિશ્વપ્રકાશં પ્રભું
    વેદાન્તૈઃ પ્રતિપાદિતં પરશિવં સ્વીયસ્વરૂપેણ યઃ ।
નાનાઘોરતરાઘપૂગતિમિરપ્રધ્વંસનદ્યોમણિઃ
    સોઽયં શ્રીવરજઙ્ગમઃ સમધિકં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૬॥

પીત્વા યત્પરમં પવિત્રમમલં કૈલાસશૈલોલ્લસ-
 ચ્છર્વોદગ્રવરપ્રદેશપદવીસોપાનભૂતં સદા ।
ભક્ત્યા ભૂમિતલે સમીહિતતતિં સમ્પ્રાપ્નુવન્ત્યાદરાત્
 તત્પાદોદકમિષ્ટદં સમધિકં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૭॥

જુષ્ટ્વા યં શ્રુતિશંસિતં પુરહરપ્રેમપ્રકર્ષાસ્પદં
 શસ્તં ધ્વસ્તસમસ્તદુષ્કૃતગણં સ્વશ્રેયસઃ શ્રીપદમ્ ।
સાન્દ્રાનન્દભરા ભવન્તિ પુરુષાઃ સર્વેઽપિ ચોર્વીતલે
 હૃદ્યઃ સ ત્રિવિધઃ પ્રસાદનિચયઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૮॥

સ્પષ્ટાષ્ટાવરણપ્રચારચતુરઃશ્રીવીરશૈવાગ્રણીઃ
 પઞ્ચાચારવિચારચારુચતુરઃ સ્વચ્છાન્તરઙ્ગઃ સદા ।
સઙ્ખ્યાવજ્જનગીયમાનવિલસન્માહાત્મ્યસમ્ભાવિતો
 ભક્તાનુગ્રહકૃત્ પુરાતનગણઃ કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૯॥

લોકે શામ્ભવમઙ્ગલાષ્ટકમિદં સર્વેષ્ટસિદ્ધિપ્રદં
 ભક્ત્યા યઃ પઠતિ પ્રહૃષ્ટહૃદયઃ શ્લાઘ્યં સુધીભિર્મુહુઃ ।
શ્રીનિર્વાણમુદાસ્રયે વિરચિતં યો વા શ઼ૃણોત્યાદરાત્
 પુંસસ્તસ્ય સદાશિવઃ સમધિકં કુર્યાત્ સદા મઙ્ગલમ્ ॥ ૧૦॥

સુમુહૂર્તે સાવધાનં સુલગ્ને સાવધાનમ્ ।

ઇતિ વીરશૈવમહાસઙ્કલ્પે વીરશૈવવિવાહપદ્ધત્યાનુસારં
મઙ્ગલાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Manish Gavkar

*Mangala Ashtakam*

pdf was typeset on March 3, 2023

Please send corrections to *sanskrit@cheerful.com*